श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगरुडदण्डकः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीगरुडदण्डकः ॥

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

नमः पन्नग नद्धाय वैकुण्ठ वश वर्तिने।
श्रुति सिन्धु सुधोत्पाद मन्दराय गरुत्मते॥ १ ॥

गरुडमखिल वेद नीडाधिरूढं द्विषत्पीडनोत्कण्ठिताकुण्ठ वैकुण्ठपीठीकृत-स्कन्धमीडे स्वनीडागति प्रीत रुद्रा सुकीर्तिस्तनाभोग गाढोपगूढस्फुरत्कण्टक-व्रात वेध व्यथा वेपमान द्विजिह्वाधिपाकल्प विष्फार्यमाण स्फटावाटिका रत्न रोचिश्छटा राजि नीराजितं कान्ति कल्लोलिनी राजितम्॥ २ ॥

जय गरुड सुपर्ण दर्वीकराहार देवाधिपाहार हारिन् दिवौकस्पति क्षिप्त दम्भोळि धारा किणाकल्प कल्पान्त वातूल कल्पोदयानल्प वीरायितो-द्यच्चमत्कार दैत्यारि जैत्रध्वजारोह निर्धारितोत्कर्ष संकर्षणात्मन् गरुत्मन् मरुत्पञ्चकाधीश सत्यादि मूर्ते न कश्चित् समस्ते नमस्ते पुनस्ते नमः॥ ३ ॥

नम इद मजहत्सपर्याय पर्याय निर्यात पक्षानिलास्फालनोद्वेल पाथोधि वीची चपेटाहतागाध पाताळ भांकार संक्रुद्ध नागेन्द्रपीडासृणी भाव भास्वन्नख श्रेणये चण्ड तुण्डाय नृत्यद्भुजङ्गभ्रुवे वज्रिणे दंष्ट्रया तुभ्यम् अध्यात्मविद्या विधेया विधेया भवद्दास्यमापादयेथा दयेथाश्च मे॥ ४ ॥

मनुरनुगत पक्षि वक्त्र स्फुरत्तारकस्तावकश्चित्रभानुप्रिया शेखरस्त्रायतां नस्त्रि-वर्गापवर्ग प्रसूतिः परव्योम धामन् वलद्वेषिदर्पज्वलद्वालखिल्य प्रतिज्ञावतीर्ण स्थिरां तत्त्व बुद्धिं परां भक्तिधेनुं जगन्मूल कन्दे मुकुन्दे महानन्ददोग्ध्रीं दधीथा मुधाकामहीनाम् अहीनामहीनान्तक॥ ५ ॥

षट्त्रिंशद्गण चरणो नर परिपाटी नवीन गुम्भगणः।
विष्णुरथ दण्डकोऽयं विघटयतु विपक्ष वाहिनी व्यूहम्॥ ६ ॥

विचित्र सिद्धिदः सोऽयं वेङ्कटेश विपश्चिता।
गरुडध्वज तोषाय गीतो गरुड दण्डकः॥ ७॥

॥ इति श्रीगरुडदण्डकः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥